Homas
the spiritual way to success
K. Krishna Prasad Bhat
Website: http://homas.in
Email: homasonline@gmail.com
Mobil: 8000858858 /9940406777



अथ वराहमन्त्रप्रसङ्गात् स्वप्नवाराहीमन्त्रोऽपि कल्पान्तरोक्तोऽत्र लिख्यते-

ईश्वर ऋषिः । अनुष्टुप् छन्दः । श्रीस्वप्नवाराही देवता । ऐं बीजम् । ह्रीं शक्तिः । ठठठ स्वाहा कीलकम् । ऐं हृत् । नमो वाराहि शिरः । अघोरे शिखा । स्वप्ने कवचम् । ठठठ नेत्रम् । स्वाहा अस्त्रम् । एतैरेव पदैः कटिकण्ठगण्डश्रोत्रनेत्रमूर्धसु न्यसेत् । ध्यानम्—

नीलाञ्जनगिरिश्यामां मणिरत्नविभूषिताम् ।
अश्वारूढां च वाराहीं पाशांकुशधरां शिवाम् ॥

कामरूपां महादेवीं खड्गखेटकधारिणीम् ।
चतुर्भुजां तीक्ष्णदंष्ट्रां दंष्ट्राग्रस्थवसुन्धराम् ॥

दुष्टसंहरणोद्युक्तां साधकानां वरप्रदाम् ।
चिरं निरन्तरं भक्त्या समुपासे सनातनीम् ॥

ऐं ह्रीं नमो वाराहि अघोरे स्वप्ने ठठठ स्वाहा ॥

इति अष्टादशार्णो मन्त्रः ॥

शृणु नारद तत्त्वेन साधना यादृशी भवेत् ।
सोपवासश्शुचिर्भूत्वा कृष्णस्यैकतमे तिथौ ॥

पूजयेद्देवदेवेशीं नैवेद्यं च निवेदयेत् ।
ततो जपं प्रकुर्वीत अष्टोत्तरसहस्रकम् ॥

समाहितमना भूत्वा ततस्सिद्धश्च साधयेत् ।
भूतं भव्यं भविष्यच्च सर्वं सा वक्ति तस्य च ॥

सा दापयति साध्यस्य स्वप्नेपूक्त्वा मनोगतम् ।

प्रार्थनाप्रकारः --

नमस्ते स्वप्नवाराहि स्वप्ने कथय मे रिपोः ।
महाभयं च जनय भक्ते मयि कृपां कुरु ॥

प्रसह्य पीडयेत् क्षिप्रं यो यथा साध्यते मया ।
पाशबद्धं नुद क्षिप्रं चित्तमाकर्षयांकुशात् ॥

दुःखं वारय खेटेन मदीयमतिदुस्तरम् ।
छिन्धि नः खड्गतो मृत्युं कथयस्व शुभाशुभम् ॥
स्वयमागत्य नः साध्यः प्रणम्याज्ञां करोत्वयम् ।

इति प्रार्थनाप्रकारः ॥

अथ प्रयोगः --

भूर्जे वा ताम्बूलदले वा विद्यामुन्मत्तरसेन वशपदसहितां लिखित्वा हृदये विन्यस्य पुष्पादिनाऽभ्यर्च्य प्राणप्रतिष्ठां कृत्वा महाज्वालाप्रयोगेण तन्मयं कृत्वा वामपादेनाक्रम्य त्रिसन्ध्यमष्टोत्तरशतं च जपेत् । दिनसप्तकात् वश्यं भवति ।

स्त्रियो(नारी)वा पुरुषो वापि प्राणैरपि धनैरपि ।
यावज्जीवं साधकानां वशीभवति दासवत् ॥

महाभस्माकृति वामपादेनाक्रम्य संजपेत् ।
प्रयच्छस्वामुकस्येष्टं स्त्रीरत्नं ग्रामपूर्वकम् ॥

राजानं मोहनं कृत्वा वशयेदवधीरयेत् ।
महाभस्माकृतिं कृत्वा हृदि वामांगुलिर्जपेत् ॥

अष्टोत्तरसहस्रं च स्वप्ने तं भीषयत्यलम् ।
दास्यति ह्यमुकस्येदं सर्वैरपि मनोरथम् ॥

अथ श्रीवाराहीमन्त्रप्रसङ्गात् महावाराहीमन्त्रोऽपि मन्त्रसारोक्तोत्र लिख्यते —

धरणीवराह ऋषिः। बृहती छन्दः। वाराही देवता। ग्लौं बीजम्। ऐं शक्तिः। ह्रीं कीलकम्। ओं ऐं ग्लौं ओं नमो भगवति वार्तालि-वार्तालि हृत्। वाराहि वाराहि वराहमुखि शिरः। अन्धे अन्धिनि नमः रुन्धे रुन्धिनि नमः शिखा। भञ्जे भञ्जिनि नमः मोहे मोहिनि नमः कवचम्। सर्वदुष्टप्रदुष्टानां सर्वेषां वाक्चित्तचक्षुर्मुखगतिजिह्वास्तम्भं कुरु कुरु नेत्रम्। शीघ्रं वश्यं कुरु कुरु अस्त्रम्। ठठठठ हुंफट् स्वाहा इति दिग्बन्धः॥

ध्यानम् —

वन्दे वाराहवक्त्रां वरमणिमकुटां विद्रुमश्रोत्रभूषां
हारग्रैवेयतुङ्गस्तनभरनमितां पीतकौशेयवस्त्राम्।
देवीं दक्षोर्ध्वहस्ते मुसलमथ वरं लाङ्गलं वा कपालं
वामाभ्यां धारयन्तीं कुवलयकलितां श्यामळां सुप्रसन्नाम्॥

ओं ऐं ग्लौं ओं नमो भगवति वार्तालि वार्तालि वाराहि वाराहि वराहमुखि वराहमुखि अन्धे अन्धिनि नमः रुन्धे रुन्धिनि नमः भञ्जे भञ्जिनि नमः स्तम्भे स्तम्भिनि नमः मोहे मोहिनि नमः सर्वदुष्टप्रदुष्टानां सर्वेषां वाक्चित्तचक्षुर्मुख-गतिजिह्वास्तम्भं कुरु कुरु शीघ्रं वश्यं कुरु कुरु ठठठठ हुं फट् स्वाहा॥ इति मन्त्रः। निग्रहस्तम्भनप्रधानोयं मन्त्रः॥ मध्यरात्रौ लक्षं जपेत् पुरश्चरणार्थम्॥

अथ प्रयोगार्थे पूजा —

क्रों क्रोधिन्यै नमः। स्तं स्तम्भिन्यै नमः। क्ष्रौं चण्डोच्चण्डाय इति पार्श्वयोः पुरतश्च समर्चयेत्॥

पुनर्मातृकाभिस्समर्चयेत्। अथ प्रयोगः —

नारिकेलफलं छित्वा तन्मध्ये तिलसंचयम् ।
क्षिपेत्तदास्ये बन्धूककुसुमानि च निक्षिपेत् ॥

मण्डलस्थतिलोर्ध्वे तु संस्थाप्य तदनन्तरम् ।
अस्त्रमन्त्रं समुच्चार्य प्रोक्षयेदस्त्रवारिणा ॥

सर्वेषां तु पदं कृत्वा साध्यनामोपबृंहितम् ।

मूलमन्त्रे सर्वेषामिति पदे (पदस्य स्थाने) साध्यनाम संयोजयेदित्यर्थः ॥

मन्त्रं समुच्चरेत्सम्यगखिलाक्षरशोभितम् ।
हलेनाकृष्य वै कण्ठं वैरिणं क्रुद्धचेतसम् ॥

मुसलेन समाताड्य तर्पयेत्कालिकाम्भसा ।
त्रिसप्तसर्वरात्रेषु चैव सन्तर्पिता प्रिये ॥

स्तम्भयेदचिरादेव सप्ताहान्नात्र संशयः ।

प्रयोगान्तरम्--

नालिकेरपयोभिर्वा निजयुक्तजलेन वा ।
त्रिसप्तरात्रं सन्तर्प्य तत्क्रोधस्तम्भनं भवेत् ।
नमोन्तं यजने होमे स्वाहान्तं सुरसुन्दरि ॥

जपतर्पणयोः कुर्यात् साधकस्तु नमःपदम् ।
स्तम्भनायेशदिग्भागे निग्रहाय च याम्यके ॥

होमाय विधिवत्कुर्यात् कुण्डं लक्षणयोजितम् ।

प्रयोगान्तरम्--

देवदारुतिलान् लाजान् जुहुयात्स्तम्भहेतवे ।

त्रिसप्तस्वर्धराग्रेषु प्रत्येकं साष्टकं शतम् ॥

हुनेच्च साधकेन्द्रो वै मध्ये लीशारिनामकम् ।
ततस्तु किङ्करीभूतः सपत्नो भवति ध्रुवम् ॥

प्रयोगान्तरम्—

सपत्नवेषं संकल्प्य मृदा वा लोहकेन वा ।
संस्थाप्य याम्यकुण्डे तं हुनेल्लाजरजःकणैः ॥

अयुतं संजपेन्मूलं त्रिसप्तक्षणदां बुधः ।
त्वङ्मांसरक्तमेदोस्थिमज्जाशुक्लानि वैरिणः ॥

योगिन्यो भक्षयन्त्याशु पञ्चमीपादसेविनः ।

अथ यन्त्रम्—

प्रणवं प्रणवेनैव विपरीतं तु वेष्टयेत् ।
ऐभ्यां ग्लौभ्यां ससाध्याभ्यां ठकारेण च वेष्टयेत् ॥

अष्टभिः कुलिशैर्विद्वान् ग्लौं क्ष्रौं वज्रपुटद्वये ।
वज्राष्टकाग्रे तारं च लिखेन्मूलं च तद्बहिः ॥

भूमण्डलं लिखेद्बाह्ये मां च कोणेषु निक्षिपेत् ।
झण्डीशेन समावेष्ट्य चतुष्कैरंकुशैश्च तत् ॥

निरुद्धे तन्निशापिण्डे निक्षिप्यान्तर्गतं यथा ।
संपूज्य निखनेद्रात्रौ गुप्तदेशेषु देवताम् ॥

वाचं क्रोधं रिपुं गर्भं गमनं स्तेनमायतम् ।
दिव्यग्रहनदीसेनां स्तम्भयेत्प्रकटानपि ॥

अस्यार्थः— प्रथमं प्रणवं विलिख्य तद्बहिः विपरीतलिखितप्रणवेन संवेष्ट्य तद्बहिर्वाग्भवद्वयेन अन्तस्साध्यनामयुक्तेन च तद्बहिर्भूबीजद्वयेन साध्यनामयुक्तेन च प्रणववेष्टनोक्तरीत्या संवेष्ट्य, तद्बहिरमृतबीजेन वेष्टयेत् । तद्बहिः परितः वज्रायुधाष्टकं विलिख्य तस्य पुटद्वये अन्तरालद्वये ग्लौं इति भूबीजं क्ष्रौं इति नृसिंहबीजं च एकैकमेकैकस्मिन् पुटे विलिख्य, वज्राष्टकाग्रे प्रणवं च बहिर्मूलमन्त्रेण संवेष्ट्य, तद्बहिश्चतुरश्रकोणेषु श्रीबीजं च तद्बहिरेकादशस्वरेण एकारेणावेष्ट्य, तद्बहिः क्रों इत्यंकुशचतुष्टयेन वृत्तचतुष्ट्ये संवेष्टयेत् । एवं विलिख्य 'हरिद्रापिण्डे निक्षिप्य संपूज्य निखनेदिति ॥

इति प्रपञ्चसारसारसंग्रहे गीर्वाणेन्द्रविरचिते
द्वाविंशः पटलः ॥